अन्यच्च ।
"शर्क्करादाड़िमाभ्याञ्च द्राक्षादाड़िमयोस्तथा ।
कल्कं विधारयेदास्ये शोषवैरस्यनाशनम् ॥
द्राक्षामलकयोः कल्कं सघृतं वदने क्षिपेत् ।
तेन घृष्टा मुखस्यान्तः संशोषस्तेन शाम्यति ॥
सुरसं जायते वक्त्रं रुचिर्भवति भोजने ॥" * ॥
निद्रानाशस्य निदानमाह ।
"लाघवं लङ्घनं चिन्ता व्यायामः शोकभीक्रुधः ।
एभिरेव भवेन्निद्रानाशः श्लेष्मातिसंक्षयात् ॥"
अस्य चिकित्सामाह ।
"भृष्टन्तु विजयाचूर्णं मधुना निशि भक्षयेत् ।
निद्रानाशेऽतिसारे च ग्रहण्यां पावकक्षये ॥
गुडं पिप्पलीमूलस्य चूर्णेनालोड़ितं लिहन् ।
चिरादपि च संनष्टां निद्रामाप्नोति मानवः ॥
वायसजङ्घामूलं मूलं वा शिरसि काकमाच्याश्च ।
विधृतं निद्राजनकं खुड्मूलं वा घृतं सगुड़म् ॥"
पीतमिति शेषः ॥
"मूलन्तु काकमाच्या बद्धं सूत्रेण मस्तके नियतम् ।
विदधाति नष्टनिद्रो निद्रामाश्वेव सिद्धामदम् ॥
शीलयेन्मन्दनिद्रस्तु क्षीरमद्यरसान् दधि ।
अभ्यङ्गोद्वर्त्तनस्नानमूर्द्धकर्णाक्षितर्पणम् ॥"
रसं मांसरसम् ॥
"कान्ताबाहुलताश्लेषानिर्वृत्तिकृतकृत्यता ।
मनोऽनुकूला विषयाः कामं निद्रासुखप्रदाः ॥
रसे शाके च सूपे च सर्पिर्यूषपयःसु च ।
निद्रां सञ्जनयत्याशु पलाण्डुरुपयोजितः ॥"
रसे मांसरसे ॥
"ऐक्षवं पोतकी माषाः सुरा मांसरसः पयः ।
गोधूमतिलमत्स्याश्च निद्रां कुर्व्वन्ति देहिनाम् ॥"
निद्रानाशे ॥ * ॥
"दारु हैमवती कुष्ठशताह्वाहिङ्गुसैन्धवैः ।
लिम्पेत् कौञ्जिकपिष्टैः शूलाध्मानयुतोदरम् ॥"
हैमवती श्वेतवचा । दारुषट्कलेपः शूलाध्मानयोः ॥ * ॥
"कटुतैलं कणाहिङ्गुवचालशुनसाधितम् ।
उष्णं विनिहितं हन्ति कर्णयोर्निस्वनं व्यथाम् ॥"
तैलं कर्णस्वने ॥ * ॥
"कणासुगन्धिवचया यवान्या च समन्विता ।
ताम्बूलसहिता हन्ति शुष्ककासं मुखे धृता ॥"
शुष्ककासे ॥ * ॥ अथान्नमाह ।
"श्रमोपवासानिलजे हितो नित्यं रसौदनः ।
मुद्गामलकयूषस्तु बद्धविट्काय दीयते ॥"
रसो विहितमांसरसः ॥
"पेयांश्च रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
कासी श्वासी च हिक्की च पञ्चमूलीश्रृतां पिबेत् ॥"
पेयमिति शेषः । इति वातज्वराधिकारः ॥*॥
अथ पित्तज्वराधिकारः । तत्र पित्तज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह ।
"पित्तलाहारभेषजाभ्यां पित्तमामाशयाश्रयम् ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगम् ॥"
पित्तस्य पङ्गुत्वात्तेन कोष्ठाग्निरुष्मा बहिर्नेतुं न शक्यते । यत आह ।
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥"
इति ॥
ततोऽत्र पित्तं वायुसहायं बोद्धव्यम् । यत आह ।
"द्रव्यमेकरसं नास्ति न रोगोऽप्येकदोषजः ।
एकस्तु कुपितो दोष इतरानपि कोपयेत् ॥" इति ।
अथ तस्य पूर्ब्बरूपमाह । पित्तान्नयनयोर्द्दाह इति । पित्तात् ज्वरे उत्पत्स्यति नेत्रदाहः स्यात् । स च श्रमादिपूर्ब्बको भवति ॥ * ॥
अथ पित्तज्वरस्य लक्षणमाह ।
"वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥"
अतिसारः पित्तस्य सरत्वात् सद्रवा प्रवृत्तिर्न त्वतीसार एव तस्य ज्वरोपद्रवत्वात् । वमिः यदा पित्तं कफस्थानं याति तदा बोद्धव्या । प्रलापोऽनर्थकं वचः । मूर्च्छारूपादेरज्ञानम् । मदः पूगकोद्रवधत्तूरभक्षणादिव मत्तता । भ्रमः चक्रारूढ़स्येव ज्ञानम् । चकारात् रक्तकोठादयो बोद्धव्याः ॥*॥ अथ पित्तज्वरस्य चिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति । दशरात्रेण लङ्घनवता व्यतीतेनेत्यर्थः ॥ * ॥
किन्तद्भेषजं तदाह ।
'तिक्तामुस्तायवैः पाठाकट्फलाभ्यां सदीच्यकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिक्काथः ॥ * ॥
"पर्पटो वासकस्तिक्ता किरातो धन्वयासकः ।
प्रियङ्गुश्च कृतः क्वाथ एषां शर्करया युतः ॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिक्काथः ॥ * ॥
"द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः क्वाथ एषां पित्तज्वरापहः ॥
मुखशोषप्रलापार्त्तिदाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिक्काथः ॥ * ॥
"पटोलयवधान्याकमधूकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णां चातिप्रमाथिनीम् ॥"
इति पटोलादिक्काथः ॥ * ॥
"गुड़ूच्यामलकीयुक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुड़ूच्यादिक्काथः ॥ * ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ॥"*॥
"ह्रीवेरं चन्दनोशीरघनपर्पटसाधितम् ।
दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहयुक् ॥"
इति ह्रीवेरादिक्काथः ॥ * ॥
"भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवाम्बुताः ।
बालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः ।
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिक्काथः ॥ * ॥
"द्राक्षाचन्दनपद्मानि मुस्ता तिक्तामृतापि च ।
धात्री बालमुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधूकं कुलकं चापि किरातो धान्यकं तथा ॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्द्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः ॥"
इति महाद्राक्षादिक्काथः ॥ * ॥
"उषितो निशि पर्य्युषितः प्रातर्धान्याकतण्डुलक्काथः ।
पीतः शमयत्यचिरादन्तर्द्दाहं ज्वरं पैत्तम् ॥"
इति धान्याकक्काथः ॥ * ॥
"अमृताया हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा कासरक्तपित्तज्वरान् जयेत् ॥"
"गुड़ूची भूमिनिम्बश्च बालं वीरणमूलकम् ।
लघु मुस्तं त्रिवृद्धात्री द्राक्षा वासा च पर्पटः ॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम् ।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥"
इति गुड़ूच्यादिक्काथः ॥ * ॥
"फलाशस्य बदर्य्या वा निम्बस्य मृदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥*॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ति
निहन्ति दाहं त्वरितं ज्वरञ्च ॥ * ॥
पथ्यां तैलघृतक्षौद्रैर्लिहन्दाहज्वरापहः ।
कासासृक्पित्तवीसर्पश्वासान् हन्ति वमीरपि ॥
तैलघृतक्षौद्रैरित्यत्र न समुच्चयस्तेन केवलेन क्षौद्रेणापि लिह्यात् ॥ * ॥
"काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ गोतक्रसंस्विन्नशीतलीकृतवाससा । * ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाड़िमबीजैर्व्वा धानाकल्केन च क्वचित् ॥"
धानात्र धान्याकम् । इति कवलः ॥ * ॥
अथान्नमाह ।
"दाहवम्यर्द्दितं क्षामं निरन्नं तृषयान्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजाशक्तुरूपं तर्पणम् । सन्तर्पणस्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ॥*॥
"मुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे ।
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले ॥
मलयोदकसंसिक्ते स्वप्यात् पित्तज्वरी नरः ॥
हारावली चन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम्